# ॥ श्री रुद्रप्रश्नः ॥

## Rudra Prashna

॥ न्यासः ॥

अस्य श्री रुद्राध्याय प्रश्न महा मन्त्रस्य , अघोर ऋषिः ,
अनुष्ठुप् छंदः , संकर्षणमूर्ति स्वरूपो योऽसावादित्यः
परम पुरुषः स एष रुद्रो देवता । नमश्शिवायेति बीजम् ।
शिवतरायेति शक्तिः । महा देवायेति कीलकम् ।
श्री सांब सदा-शिव प्रसाद सिद्ध्यर्थे जपे विनियोगः ॥

## ॥ करन्यासः ॥

ओं अग्निहोत्रात्मने अंगुष्ठाभ्यां नमः ।

दर्श पूर्ण मासात्मने तर्जनीभ्यां नमः ।

चातुर्मास्यात्मने मध्यमाभ्यां नमः ।

निरूढ पशुबंधात्मने अनामिकाभ्यां नमः ।

ज्योतिष्टो मात्मने कनिष्ठिकाभ्यां नमः ।

सर्व क्रत्वात्मने करतलकरपृष्ठाभ्यां नमः ।

## ॥ हृदयादि अंगन्यासः ॥

अग्निहोत्रात्मने हृदयाय नमः ।

दर्श पूर्ण मासात्मने शिरसे स्वाहा ।

चातुर्मास्यात्मने शिखायै वषट् ।

निरूढ पशुबंधात्मने कवचाय हुम् ।

ज्योतिष्टो मात्मने नेत्रत्रयाय वौषट् ।

सर्व क्रत्वात्मने अस्त्राय फट् ।

भूर्भुवस्सुवरोमिति दिग्भंधः ॥

## ॥ ध्यानम् ॥

आपाताल नभः स्थलान्त भुवन ब्रह्माण्ड माविस्फुरत्
ज्ज्योतिः स्फाटिक लिङ्ग मौलि विलसत् पूर्णेन्दु वान्तामृतैः
असतोकाप्लुत मेकमीश मनिशं रुद्रानुवाका ञ्जपन्
ध्याये दीप्सित सिद्धयेऽध्रुवपदं विप्रोऽभिषिञ्चेच्छिवम् ॥

ब्रह्माण्ड व्याप्त देहा भसित हिमरुचा भासमाना भुजङ्गैः
कण्ठे कालाः कपर्दा कलित शशिकला श्चण्डकोदण्ड हस्ताः ।
त्र्यक्षा रुद्राक्ष मालाः प्रकटितविभवाः शांभवा मूर्तिभेदाः
रुद्राः श्री रुद्रसूक्त प्रकटितविभवाः नः प्रयच्छन्तु सौख्यम् ॥